अष्टमहिषीयुक्तकृष्णस्तोत्रम्

हृद्गुहाश्रितपक्षीन्द्रवल्गुवाक्यैः कृतस्तुते ।
तद्गरुत्कन्धरारूढ रुक्मिणीश नमोऽस्तु ते ॥ १॥

अत्युन्नत्याऽखिलैः स्तुत्य श्रुत्यन्तात्यन्तकीर्तित ।
सत्ययोजित सत्यात्मन् सत्यभामापते नमः ॥ २॥

जाम्बवत्याः कम्बुकण्ठालम्बिजृम्भिकराम्बुज ।
शम्भुत्र्यम्बकसम्भाव्यं साम्बतात नमोऽस्तु ते ॥ ३॥

नीलाय विलसद्भूषाजालायोज्ज्वलमालिने ।
लोलालकोद्यत्फालाय कालिन्दीपतये नमः ॥ ४॥

जैत्रचित्रचरित्राय शात्रवानीकमृत्यवे ।
मित्रप्रकाशाय नमो मित्रविन्दाप्रियाय ते ॥ ५॥

बालानेत्रोत्सवानन्तलीलालावण्यमूर्तये ।
नीलाकान्ताय ते भक्तावालायाऽस्तु नमोनमः ॥ ६॥

भद्राय स्वजनाविद्यानिद्राविद्रावणाय वै ।
रुद्राणीभद्रमूलाय भद्राकान्ताय ते नमः ॥ ७॥

रक्षिताखिलविश्वाय शिक्षिताखिलरक्षसे ।
लक्षणापतये नित्यं भिक्षुश्लाघ्याय ते नमः ॥ ८॥

षोडशस्त्रीसहस्रेशं षोडशातीतमच्युतम् ।
ईडेत वादिराजोक्तप्रौढस्तोत्रेण सन्ततम् ॥ ९॥

इति श्रीमद्वादिराजयतिकृतं

अष्टमहिषीयुक्तकृष्णस्त्रोत्रं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु